नं. ५०१२

गायत्री मन्त्रार्थः

× × ×

पत्र. ४ —— —— ०

✓ धर्मशास्त्रं

ख गायत्रीमंत्रार्थः

५०१२

5012
F=4

अथ गायत्र्यर्थः तथाहि यो नो धियः प्रचोदयात् तत्सवितुर्देवस्य वरेण्यं भर्गो धीमहीत्यन्वयः तत्र यो नो धियः प्रचोदयादित्यस्यार्थः
कमलेक्षणमित्यनेन संगृह्यते हृत्कमले ईक्ष्यते योगिभिरिति कमलेक्षणः तं सर्वनियंतारं अष्टपत्रं विकसितं हृत्पद्मं तन्मध्ये संस्थितं अंत
प्रविष्टः शास्ता जनानां ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया इति शास्त्रात् देवपदार्थमाह
ब्रह्मेति स्वरूपगुणादिभिर्निरतिशयबृहत्त्वात् ब्रह्मशब्दाभिधेयमित्युक्तं पुरस्तात् तदेव देवपदेनाभिधीयते तथाहि दीव्यति क्रीड
ति विश्वसर्गादिभिरिति देवः ॐ नमो विश्वरूपाय विश्वस्थित्यंतहेतवे [illegible] अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इति भगवद्व
चनाच्च विजिगीषते असुरानिति देवः कंसवंशविनाशाय केशिचाणूरघातिने संरक्षणाय साधूनां विनाशाय दुष्टदैत्यानामिति यद्भूता
सर्वभूतेष्वंतर्यामितया व्यवहरतीति देवः य आत्मानमंतरो यमयति एष त आत्मांतर्याम्यमृतः सर्वस्य चाहं हृदि संनिविष्ट इति द्योत
नादिति देवः तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति येन सूर्यस्तपति तेजसेद्धः यदादित्यगतं तेजो जगद्भासयतेऽखिलं
यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति सूयते ब्रह्मादिभिरिति देवः तमेकं गोविंदं सच्चिदानंदविग्रहं वृंदावनसुरभूरुह
तलासीनं परमया स्तुत्या तोषयामि स्तुवंति त्वं स्तुतिभिः पिंगलाभिः सर्वत्र गच्छतीति देवः यः सर्वज्ञः सर्ववित् वेदाहं समतीतानि
वर्तमानानि चार्जुन भविष्याणि च भूतानि मां तु वेद न कश्चनेति अनेजदेकं मनसो जवीयः मया ततमिदं सर्वं जगदव्यक्तमू
र्तिनेति एको वशी सर्वगः कृष्ण ईड्यः मोदते वेति देवः एष आनंदयतीति इत्यादिनिर्वचनेभ्यो देवशब्दो ब्रह्मवाचक इति भावः
एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मेति श्रुतेः स्मृतेश्चैवं भगवता बादरायणेन जिज्ञासाविषयतया देवपदार्थस्य
ब्रह्मत्वेन एवं मुख्याभिमुखेन व्याख्यातो देवशब्द इदानीं लक्षणामुखेनाप्याह तत्सवितुरिति तच्छब्दो गायत्रीविषयभूतं ब्रह्म परमंत
र्यामिणमाह योऽस्माकं बुद्धिप्रेरकः स चासौ सविता चेति तत्सवितेति यत्तदोर्नित्यसंबंधात् जगत्सूयते यस्मादिति सविता प्रजानां च
प्रसवनात् सवितेत्यभिधीयते इति विष्णुधर्मोत्तरवचनात् उपलक्षणं चैतत् स्थितिप्रलययोः तथा च विश्वस्य जन्मस्थिति
लयकारणमिति सिद्धं ब्रह्मलक्षणं यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्ब्रह्म तद्विजिज्ञा

सत्येतिश्रुतेः यतः सर्वाणिभूतानिप्रभवंतियुगागमे यस्मिंश्चप्रलयंयांतिपुनरेवयुगक्षये अहंसर्वस्यप्रभवोमत्तःसर्वं
प्रवर्ततेइत्यादिस्मृतेश्च जन्माद्यस्ययतइतिन्यायाच्च एवमुदाहृतेभ्यःप्रमाणेभ्यो ध्येयस्यतत्वानांनिर्वचनात्तेषांलक्षणस्यच
विषयः समन्वयाधिकरणंचभगवान्वासुदेवएवेति निश्चितम्भर्गपदंव्याचष्टे सूक्ष्ममिति भर्जयतिव्याप्तुरांकर्माणी
तिभर्गो दिव्यमंगलवपुर्वाचकः सकारांतो द्वितीयैकवचनो यंभर्गः सच यदापश्यःपश्यतेरुक्मवर्णमित्यारभ्यतदाविद्वा
न्पुण्यपापेविधूयनिरंजनः परमंसाम्यमुपैतीति भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणितस्मिन्दृष्टे
परावरेइत्यादिश्रुतिभ्यः दिव्यमंगलविग्रहः सूक्ष्मएवभर्गशब्दाभिधेयः तमेकंगोविंदंसच्चिदानंदविग्रहमितिमंत्रवर्णा
त् किंचतत्कुहोवुःकः सूक्ष्मः इतिप्रश्ने पापकर्मकर्षतिउत्तरवचनात् पापंकर्षतीतिनिर्मूलयतीतिसूक्ष्मइतिनिरुक्तिरुक्ता पा
पशब्दःपुण्यपापस्याप्युपलक्षणार्थः तथाचअनादिपापपुण्यात्मककर्मकर्षकत्वात्सूक्ष्मोभर्गशब्दवाच्य इतिभावः तथा
यदीश्वरंपुरुषाख्यमृतुंसत्यंधर्मोरामसुतं भर्गोऽथविश्वरूपंयद्वेयंगत्वामृतमश्नुते यद्वाभरणागमनयोगाद्भकारांतोयं
भर्गशब्दः विश्वभर्तासर्वज्ञव्यापीविश्वात्माभिसर्वकारणब्रह्मवाचकः तथाचयोभर्गइतिपदच्छेदेनान्वेतियःसर्वभर्ता
सर्वगोदेवइत्यर्थः एतेनशास्त्रयोनित्वंसर्ववेदसमन्वितत्वंमोक्षप्रदातृत्वंचोक्तंभवति तथाहि यजुर्गतकारणंतदेववेदां
तशास्त्रविषयभूतंवस्तुतत्रैवसर्वशास्त्रसमन्वयान्मोक्षकारणमिति सूत्रकृतामभिप्रायः अथातोब्रह्मजिज्ञासेत्यारभ्याना
वृत्तिःशब्दादित्यंतेनाध्यायचतुष्टयात्मकेनशास्त्रेणानिर्णीतः मोक्षप्रदत्वात्सर्वोपास्यत्वमाह वरेण्यमिति मुमुक्षुभिरनन्य
तयावरणीयमित्यर्थः मुनयोहवैब्रह्माणमूचुःकःपरमोदेवःकुतोमृत्युर्बिभेतिइत्युपक्रमेप्रश्नः तस्मात्सूक्ष्मएवपरोदेवइत्यध्या
यदिसुत्रेणोपसंहारवाक्यात् योगात्रीप्रतिपाद्योदेवः सएवसूक्ष्मःतमेवध्यायेदित्यर्थः तदेवाह ध्यायेमइति धीमहीत्यस्यप
र्यायः आत्मावारेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यःसोन्वेष्टव्यःसविजिज्ञासितव्यइत्यादिश्रुत्युक्तविधौधीमहीति
लृङ्प्रयोगःछांदसः इदानींसर्वपासनानाममंत्रेऽंतर्भावमाह भूतानामिति ननुयतोवाइमानिभूतानिजायंतेजन्माद्य

२

स्य पत इत्यादौ सामान्यप्रयोगात् सामान्यस्य पत्नंदादे विशेषवत्तं ब्रह्मादिविशेषपर्यवसायी जगत्कारणविधायकश्रुतीनां हिरण्यग
र्भः समवर्तताग्रे आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता विरं
चो वा इदं विरंचयति विदधातीति ब्रह्मा वा अविरंच एतस्माद्धीमे रूपनामनी न सन्न चासच्छिव एव केवलः एको रुद्रो न द्विती
याय तस्थे यो देवानां प्रभवश्चोद्भवश्चेत्यादीनां ब्रह्मरुद्रादिविविधविषयकत्वात् कथं ह्यस्य जगत्कारणत्वं निश्चीयत इत्या
शंकायां समाधानमाह परमिति कारणकारणं ईश्वरेश्वरं देवदेवं ब्रह्मरुद्रादिजनकं ब्रह्मादिगुणमित्यर्थः तमीश्वराणां
परमं महेश्वरं तं देवतानां परमं च दैवतं स कारणं कारणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप इति श्रुतेः अतःप
रतरं नान्यत्किंचिदस्ति धनंजय परः पराणां सकला न यत्र क्लेशादयः संतीत्यादिस्मृतेश्च ब्रह्मादीनां तु क्वचिदैश्वर्यश्रवणमपि ज
न्यत्वकर्मत्वं त्वादिश्रवणान्यपरत्वेनेत्यर्थः एको ह वै नारायण आसीन्न ब्रह्मा नेशानः तस्य ललाटात् त्र्यक्षः शूलपा
णिर्जायते तस्य ध्यानान्तस्थस्य ललाटात्स्वेदोऽपपत् ता इमा आपः तत्र हिरण्मयमण्डं तत्र ब्रह्मा चतुर्मुखो जायते नारायणाद्ब्र
ह्मा जायते नारायणाद्रुद्रो जायते यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै यो ब्रह्माणं विदधाति पूर्वं यो विध
त्तस्मै गोपायति स्म कृष्णः अस्य देवस्य मीढुषो वया विष्णोरेव प्रहृदे ईह विभिर्विदे हि रुद्रो रुद्रोऽयं महित्वा भाति बहुश्रवः सो
ब्रवीदहं ह्यणीक्ष अहमेव पशूनामधिपतिरसानीति तस्माद्रुद्रः पशूनामधिपतिरिति भगवतश्चोभयोः साक्षाज्जन्मविद्यादि
लाभश्च श्रूयते तथैव स्मर्यते च यस्य प्रसादादहमच्युतश्च भूतः प्रजासृष्टिकरोऽन्तकारी क्रोधाच्च रुद्रः स्थितिहेतुभूतो यस्मा
च्च मध्ये पुरुषः परस्तादिति वैष्णवे प्रजापतिं च रुद्रं चाप्यहमेव सृजामि वै एतौ मां न विजानीतो मम मायाविमोहितौ
इति मोक्षधर्मे युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुमः मया सृष्टः पुरा ब्र
ह्मा मद्यज्ञमयजत्स्वयम् ततस्तस्य वरान्प्रीतो ददावहमनुत्तमान् मत्पुत्रत्वं च कल्पादौ लोकाध्यक्षत्वमेव च इति विष्ण

शिव
२

रूपो महादेवः सर्वमेधे महाक्रतौ जुहाव सर्वभूतानि स्वयमात्मानमात्मना महादेवः सर्वमेधे महात्मा हुत्वात्मानं देवदेवो बभूव वि
श्वाँल्लोकान्व्याप्य विष्टभ्य कीर्त्या विराजते द्युतिमान्कृत्तिवासा इति भारते ब्रह्मादयः सुराः सर्वे विष्णुमाराध्य ते पुरा स्वं स्वं पदमनुप्राप्ताः केश
वस्य प्रसादतः इति नारसिंहे ते देवा ऋषयश्चैव नानातनुसमाश्रिताः भक्त्या संपूजयंत्येनं गतिं चैषां ददाति सः ततस्ते विबुधाः सर्वे ब्रह्मा
ते च महर्षयः वेददृष्टेन विधिना वैष्णवं क्रतुमाचरन् प्रापुरादिसर्वेषां तं पुरुषं तमसः परमिति नारायणीये तत्रैव भगवान् येन यः
कल्पितो भागः स तथा मामुपागतः प्रीतोऽहं प्रददाम्यद्य फलमाहृत्तलक्षणमिति छांदोग्ये विरूपाक्षाय ब्रह्मापाय विश्वेदेवाय ब्र
ह्मणः पुत्राय ज्येष्ठाय शतपथब्राह्मणे च संवत्सरे कुमारो जायत कुमारो रोदीत् प्रजापतिरब्रवीत् किं रोदिषि यच्छ्रमात्तपसोऽधि
जातोऽसीति सोऽब्रवीदनपहतपाप्मा अस्म्यहितनामा नाम मे देहीति नारायणः परः परो देवस्तस्माज्जातश्चतुर्मुखः तस्माद्रुद्रोऽभवद्देवः स च
सर्वज्ञतां गत इति वाराहे अहं ब्रह्मा चाद्य ईशः प्रजानां तस्माज्जातस्त्वं च मत्तः प्रसूतः मत्तो जगज्जंगमं स्थावरं च सर्वे वेदाः सरहस्या
श्च पुत्रेति नारायणीये इति श्रुतिस्मृतिभ्यो भगवतः सकाशाच्चतुर्मुखस्तस्माद्रुद्रोद्भवः स च कल्पभेदाद्रुद्रोऽप्यवसितम् ननु क
चिद्ब्रह्मशिवलिंगादिपुराणेषु ब्रह्मशिवादीनामप्येवं व्याख्यातं तथा सति तेषामपि पुराणत्वेन प्रमाणत्वाविशेषात् कथं विष्णो
रेव परत्वं निश्चीयत इति चेन्न तेषां पुराणत्वाविशेषेपि राजसतामसत्वाभ्यां संसारहेतुत्वेन दुर्बलत्वात् सात्विके मोक्षकारणमेते
ष्वेवाबाध्यत्वं युक्तमेव एतदुक्तं पुराणानि चतुर्विधानि सात्विकराजसतामससंकीर्णभेदात् सात्विककालोद्भवं सात्विकविष
याधिकारिकं सात्विकं राजसकालोद्भवं राजसे राजसवस्तुप्रतिपादकं तथाभूताधिकारिकं राजसं एवमन्यदप्यूहनीयम्
तथा च मात्स्ये संकीर्णास्तामसाश्चैव राजसाः सात्विकाः स्मृताः कल्पाश्चतुर्विधाः प्रोक्ता ब्रह्मणो दिवसाश्च ते यस्मिन्कल्पे तु यत्
प्रोक्तं पुराणं ब्रह्मणा पुरा तस्य तस्य तु माहात्म्यं तत्कल्पे विधीयते अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्तितं राजसेषु च माहात्म्य
मधिकं ब्रह्मणो विदुः संकीर्णेषु सरस्वत्याः पितॄणां च निगद्यते सात्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः तेष्वेव योगसंसिद्धा
गमिष्यंति परां गतिं इति कौर्मेऽपि असंख्यातास्तथा कल्पा ब्रह्मविष्णुशिवात्मकाः कथिता हि पुराणेषु मुनिभिः कालचिंतकैः

सात्विकेष्वपि कल्पेषु माहात्म्यमधिकं हरेः । तामसेषु शिवस्योक्तं राजसेषु प्रजापतेरिति तत्र वैष्णवपाद्मादीनां सात्विकत्वं सत्वे
न कार्त्स्न्येनाभिव्यक्तत्वात् शैवलैङ्गादीनां तु रजस्तमोमूलत्वे विक्षेपावरणोद्भूत्या स्मृतेरप्यपह्नवपरत्वात् नहि पतितानां परत्वप्रकाश
कत्वाच्च संशयविपर्ययहेतुत्वेन बाधकत्वं एवं हि मुमुक्षुभिः श्रेयस्कामैः राजसादीन् हित्वा सात्विकान्येवावलम्बयन्ति श्रेयस्कार
णभूतानि सदा सेव्यानीति तथा चाह भगवान्मनुः या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः सर्वास्ता निष्फलाः प्रेत्य तमोनि 3
ष्ठा हि ताः स्मृता इति उपलक्षणं चात्र पुराणानां उक्तलक्षणः श्लोको वा श्लोकार्द्धं वा पदमात्रं वा सात्विकं राजसलक्षणं च श्लोका
दि राजसं तथैव तामसं संकीर्णं चेति विवेचनीयं ननु यद्येवं तर्हि सर्वैरप्येवं निर्णीय सात्विकमेवाधिकमिति न सेव्यते इति चेन्न
दुःसहत्वयोगादिति ब्रूमः तत्र स्वयमेव गीतं भगवता श्रीमुखेनान्वयव्यतिरेकाभ्यां न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः
माययापहृतज्ञाना आसुरं भावमाश्रिताः महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः भजन्त्यनन्यमनसो ज्ञात्वा भूतादि
मव्ययमिति किं च मनुष्याणां सहस्रेषु यश्चिद्यतति सिद्धये इत्यादिप्रमाणेन जन्मान्तरसहस्रकृतपुण्यपुंजः कश्चिद्भग
वद्भक्तावधिक्रियते जन्मान्तरसहस्रेषु तपोदानसमाधिभिः नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायत इति वचनात् न
तस्य जन्मसमये श्रीभगवत्कृपाकटाक्षावलोकितः सात्विको भूत्वा सात्विकैः संगम्य सात्विकान्येव सेवते स्तु अतएव अन्य
था अन्यैरेवलोकितश्चैव तथाभूतैरेव संगम्य संसारी भवति तथा चोक्तं मोक्षधर्मे जायमानं हि पुरुषं यं पश्येन्मधुसूदनः सात्वि शिव
कः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः पश्यत्येनं जायमानं ब्रह्मा रुद्रोऽथवा पुनः रजसा तमसा चैव मानसं समभिप्लुतमिति ३
सात्विकैः सेव्यते विष्णुस्तामसैश्चैव शंकरः राजसैः सेव्यते ब्रह्मा संकीर्णैश्च सरस्वती सादोषमपि चिंतनीयानि ननु गायत्री
वृत्तिः सवितृपदस्य सूर्यपरत्वात् सूर्यस्य योगबाधकत्वेन बलवत्वात् सूर्यप्रतिपादकस्य गायत्रीमंत्रस्य स्यगम्यते

तथा च गायत्रीविषयस्यैव वेदोदविषयत्वात् सूर्यस्यैव परत्वमिति चेन्न रूढेर्योगाद् बलवत्त्वेऽपि तात्पर्यबाधे विप
र्ययदर्शनात् आकाशादिप्राणादिषु तथा निर्णयात् तथा हि श्रूयते छांदोग्ये शालावत्यजैवलिसंवादे अस्य
लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्त्याकाशो
ह्येवैभ्यो ज्यायानाकाशः परायणमिति अत्राकाशशब्दो भूताकाशपरो ब्रह्मपरो वेति संशयः तत्र भूताकाशपर ए
वेति पूर्वपक्षः कुतः आकाशपदस्य भूताकाशे रूढत्वात् योगवृत्ते रूढेर्बलीयस्त्वात् इति प्राप्ते सिद्धान्तः आकाशस्तल्लिं
गादिति आकाशः परमात्मैव कुतः तल्लिंगाद् आकाशेनैतस्यैव परमात्मनः असाधारणलिंगानां जगत्कारणत्वशुभा
यत्वपरायणत्वादीनां श्रवणात् भूताकाशस्य वाय्वादीनां कारणत्वेऽपि सर्वकारणत्वासंभवात् तस्माद्वा एतस्मा
दात्मन आकाशः संभूत इति जन्यत्वश्रवणाच्च य आकाशमन्तरो यमयतीति नियम्यत्वश्रवणाच्च तस्माल्लिंगा
न्यथानुपपत्तिसहकृतयोगवृत्तेर्बलीयस्त्वा रूढेर्बाध इति धर्मसमभिव्याप्त्याकाशानन्दशत तमेव भान्तमनुभाति
सर्वमिति श्रुत्यन्तरात् तथैवावाम्यदपि तत्राम्नायः कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि भू
तानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्तेति तत्र प्राणशब्दो वायुवृत्तौ ब्रह्म
णि वेति संशयः वायुवृत्तौ रेव शक्य इति पूर्वपक्षः कुतस्तत्रैव प्राणशब्दस्य रूढत्वेनातिप्रसिद्धत्वात् इत्यत्र सूत्रे अत
एव प्राणः प्राणपदाभिधेयः पुरुषोत्तम एव कुतः अतएव सर्वभूताभिसंवेशनादिपरमात्मलिंगादेव तथा च
वायुवृत्तावनुपपन्नत्वात् श्रुतिसमन्वयाध्याये प्रथमपादे निर्णीतं सूत्रकृद्भिः तथैवात्रापि सविंदत् शब्दस्य रू
ढिवृत्त्यादिसपरत्वेऽपि सर्वधीनियंतृत्वादीनां परमात्मासाधारणलिंगानां तत्रासंभवात् योगवृत्त्याहनवि
षयकत्वं निश्चीयते आदित्यस्य नियम्यजन्यत्वपरांगत्वपरतंत्रप्रकाशत्वादीनामनीश्वरलिंगानां श्रव

8 णां तज्जीवत्वं स्पष्टत्वं एव स्तावत्स्य त्र रासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठतः भीषास्माद्वातः प
वते भीषोदेति सूर्यः चक्षोः सूर्यो अजायत सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत् अग्निर्मूर्द्धा चक्षुषी
[redacted] यं द्रष्टव्यो येन सूर्यस्तपति तेजसेद्धः न यत्र सूर्यो भाति न चंद्रतारकं यत्र न सूर्यस्तप
ति यत्र न वायुर्वातीत्यादिश्रुतिभ्यः तस्माद्गायत्रीमंत्रप्रतिपाद्यः सर्वज्ञः सर्वशक्तिः स्वाभाविकाचिंत्यानं
त गुणाश्रयः श्रीभगवान्पुरुषोत्तमोऽस्मात्कांत्तमेवेति सिद्धम् ॐ इदं मया कस्यचिन्निवार्कमतस्थस्य मध्या
द्विखितमिति तेन ग्रंथोक्तोपरि संपूर्णं गायत्र्यर्थं प्रदर्शितं अत एव चास्य शास्त्रस्यार्थो भर्गशब्दे कृतमिति

शिव ४